श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ वैताळिकपद्धतिः नवमी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ वैताळिकपद्धतिः नवमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

नमस्ते पादुके ! पुंसां संसारार्णवसेतवे।
यदारोहस्य वेदान्ता वन्दिवैतालिकाः स्वयम् ॥ 9.1 ॥

उचितमुपचरिष्यन् रङ्गनाथ ! प्रभाते
विधिशिवसनकाद्यान् बाह्यकक्ष्यानिरुद्धान्।
चरणकमलसेवासौख्यसाम्राज्यभाजां
प्रथमविहितभागां पादुकामाद्रियेथाः ॥ 9.2 ॥

पद्माजुष्टं भजतु चरणं पादुका लब्धवारा
प्रत्यासन्नास्तव परिजनाः प्रातरास्थानयोग्याः।
अर्धोन्मेषादधिकसुभगामर्धनिद्रानुषङ्गां
नाभीपद्मे तव नयनयोर्नाथ ! पश्यन्तु शोभाम् ॥ 9.3 ॥

उपनमति मुहूर्तं शेषसिद्धान्तसिद्धं
तदिह चरणरक्षा रङ्गनाथ त्वयैषा।
मृदुपदमधिरूढा मञ्जुभिः शिञ्जितैः स्वैः
उपदिशतु जनानामुत्सवारम्भवार्ताम् ॥ 9.4 ॥

रङ्गाधीश ! मरुद्गणस्य मकुटादाम्नायबृन्दस्य वा
प्रत्यानीय समर्पिता विधिमुखैर्वारक्रमादागतैः।

वाहारोहणसंभृतं श्रमभरं सम्यग्विनेतुं क्षमा
    लीलासञ्चरणप्रिया स्पृशतु ते पादाम्बुजं पादुका ॥ **9.5** ॥

वृत्तं क्रमेण बहुधा नियुतं विधीनाम्
    अर्धं द्वितीयमिदमङ्कुरितं तवाह्नः ।
नीलासखीभिरुपनीय निवेश्यमाना
    मङ्क्तुं प्रभो ! त्वरयते मणिपादुका त्वाम् ॥ **9.6** ॥

दिव्याप्सरोभिरुपदर्शितदीपवर्गे
    रङ्गाधिराज ! सुभगे रजनीमुखेऽस्मिन् ।
संरक्षिणी चरणयोः सविलासवृत्तिः
    नीराजनासनमसौ नयतु स्वयं त्वाम् ॥ **9.7** ॥

आसनादुचितमासनान्तरं रङ्गनाथ ! यदि गन्तुमीहसे ।
सन्नतेन विधिना समर्पितां सप्रसादमधिरोह पादुकाम् ॥ **9.8** ॥

परिजनवनिताभिः प्रेषितः प्राञ्जलिस्त्वां
    प्रणमति मदनोऽयं देव ! शुद्धान्तदासः ।
फणिपतिशयनीयं प्रापयित्री सलीलं
    पदकमलमियं ते पादुका पर्युपास्ताम् ॥ **9.9** ॥

इति निगमवन्दिवचसा समये समये गृहीतसङ्केतः ।
अभिसरति रङ्गनाथः प्रतिपदभोगाय पादुके ! भवतीम् ॥ **9.10** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे वैतालिकपद्धतिः नवमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥